

# भक्ति गीत
# श्री नाम रामायणम्


श्री लक्ष्मणाचार्


**Blessings of**



**Pitadhipathi Srimad Sri Varaha Maha Desikan**

**SRIRANGAM SRIMAD ANDAVAN ASHRAMAM**


k kh g gh Standard, color-coded phonic delineation for languages that need it

© document generated using TT28 Publisher @ www.aradhanam.org

🙏 श्रीः 🙏

## बालकाण्डम्

*शुद्ध ब्रह्म परात्पर राम्*
*कालात्मक परमेश्वर राम्*

शेष तल्प सुख निद्रित राम्
ब्रह्माद्यमर प्रार्थित राम्

चण्ड किरण कुल मण्डन राम्
श्रीमद् दशरथ नन्दन राम्

कौसल्या सुख वर्धन राम्
विश्वामित्र प्रियधन राम्

घोर ताटका घातक राम्
मारिचादि निपातक राम्

कौशिकमख संरक्षक राम्
श्रिमदहल्योद्धारक राम्
गौतम मुनि सम्पूजित राम्

सुर मुनि वर गण संस्तुत राम्
नाविकधावित मृदुपद राम्

मिथिलापुर जन मोहक राम्
विदेह मानस रञ्जक राम्

त्र्यम्बक कार्मुक भञ्जक राम्
सीतार्पित वरमालिक राम्

कृतवैवाहिक कौतुक राम्
भार्गव दर्प विनाशक राम्
श्रीमदयोध्या पालक राम्

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

## अयोध्याकाण्डम्

*अगणित गुणगण भूषित राम्*
*अवनीतनया कामित राम्*

राका चन्द्र समानन राम्
पित्रु वाक्याश्रित कानन राम्

प्रिय गुह विनिवेदित पद राम्
तत्क्षालित निज मृदुपद राम्

भरद्वाज मुखानन्दक राम्
चित्रकूटाद्रि निकेतन राम्

दशरथ सन्तत चिन्तित राम्
कैकेयी तनयार्तिथ राम्

विरचित निज पित्रुकर्मक राम्
भरतार्पित निज पादुक राम्

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

## अरण्यकाण्डम्

*दण्डकावन जन पावन राम्*
*दुष्ट विराध विनाशन राम्*

शरभङ्ग सुतीक्ष्णार्चित राम्
अगस्त्यानुग्रह वर्धित राम्

गृध्राधिप संसेवित राम्
पञ्चवटी तट सुस्थित राम्

शूर्पणखार्ति विधायक राम्
खरदूषण मुख सूदक राम्
सीताप्रिय हरिणानुग राम्

मरीचार्ति कृदाशुग राम्
विनष्ट सीतान्वेषक राम्

गृध्राधिप गति दायक राम्
शबरी दत्त फलाशन राम्
कबन्ध बाहुच्छेदन राम्

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

## किष्किन्धाकाण्डम्

*हनुमत् सेवित निजपद राम्*
*नत सुग्रीवाभीष्टद राम्*

गर्वित वालि संहारक राम्
वानर दूत प्रेषक राम्
हितकर लक्ष्मण संयुत राम्

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

## सुन्दरकाण्डम्

*कपिवर सन्तत संस्मृत राम्*
*तद्गति विघ्न ध्वंसक राम्*

सीता प्राणाधारक राम्
दुष्ट दशानन दूषित राम्
शिष्ट हनूमद् भूषित राम्

सीता वेदित काकावन राम्
कृत चूडामणि दर्शन राम्
कपिवर वचनाश्वासित राम्

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

## युद्धकाण्डम्

*रावण निधन प्रस्थित राम्*
*वानर सैन्य समावृत राम्*

शोषित सरिदीशार्थित राम्
विभीषनाभय दायक राम्

पर्वत सेतु निबन्धक राम्
कुम्भकर्ण शिरच्छेदक राम्

राक्षस सङ्घ विमर्दक राम्
अहिमहि रावण चारण राम्

संहृत दशमुख रावण राम्
विधिभव मुखसुर संस्तुत राम्

खस्थित दशरथ वीक्षित राम्
सीता दर्शन मोदित राम्

अभिषिक्त विभीषणनत राम्
  पुष्पकयानारोहण राम्

भरद्वजादि निषेवण राम्
  भरत प्राण प्रियकर राम्

साकेतपुरि भूषण राम्
  सकल स्वीयसमानत राम्

रत्नलसत्पीठास्थित राम्
  पट्टाभिषेकालङ्कृत राम्

पार्थिव कुल सम्मानित राम्
  विभीषणार्पित रङ्गक राम्

कीश कुलानुग्रह कर राम्
  *सकल जीव संरक्षक राम्*
    *समस्त लोकाधारक राम्*

*राम राम जय राजा राम्*
  *राम राम जय सीता राम्*

## उत्तरकाण्डम्

*आगत मुनिगण संस्तुत राम्*
  *विश्रुत दशकण्ठोद्भव राम्*

सीतालिङ्गन निर्वृत राम्
नीति सुरक्षित जनपद राम्

विपिन त्याजित जनकज राम्
कारित लवणासुर वध राम्

स्वर्गत शम्बुक संस्तुत राम्
स्वतनय कुशलव नन्दित राम्

अश्वमेध क्रतु दीक्षित राम्
कालावेदित सुरपद राम्

आयोध्यक जन मुक्तिद राम्
विधिमुख विबुधानन्दक राम्

तेजोमय निज रूपक राम्
संसृति बन्ध विमोचक राम्

दर्म स्थापन तत्पर राम्
भक्ति परायण मुक्तिद राम्

सर्व चराचर पालक राम्
सर्व भवामय वारक राम्

***वैकुण्ठालय संस्थित राम्***
***नित्यानन्द पदस्थित राम्***

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

*राम राम जय राजा राम्*
*राम राम जय सीता राम्*

राम राम जय राजा राम्
राम राम जय सीता राम्

🙏 जै श्रीराम् 🙏